रथनग्रहणं, निरोधः.—(Calamity, affliction) क्लेशः, दुःखं, दुर्दशा, दुरवस्था, दुर्गतिः *f.*, दौर्गत्यं, व्यथा, कष्टं, पीडा, शोकः, सन्तापः, उद्वेगः, वैक्लव्यं, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, व्यसनं, विप्लवः, उपप्लवः, उत्पातः, विधुरं, अरिष्टं, मन्युः *m.*, बाधः, दैन्यं, वृजिनं, विडम्बना, आदीनवः, आस्रवः.

To DISTRESS, *v. a.* क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, बाध् (c. 1. बाधते -धितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, उपतप्; उद्विज् in caus. (-वेजयति -यितुं), क्लेशं दा, व्यथां कृ, खिद् in caus. (खेदयति -यितुं).

DISTRESSED, *p. p.* क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, पीडितः -ता -तं, व्यथितः -ता -तं, दुःखितः -ता -तं, क्लिश्यमानः -ना -नं, क्लेशभाक् *m. f. n.* तापितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, सन्तापितः -ता -तं, बाधितः -ता -तं, विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं, आपद्ग्रस्तः -स्ता -स्तं, दुर्दशापन्नः -न्ना -न्नं, आपद्गतः -ता -तं, कृच्छ्रगतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं, दुर्गतः -ता -तं, आतुरः -रा -रं, दुःखान्वितः -ता -तं, दुःखी -खिनी -खि (न्), दुःखार्त्तः -र्त्ता -र्त्तं, कातरः -रा -रं, उपतप्यमानः -ना -नं, आतप्यमानः -ना -नं, अभ्यर्हितः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्विग्नः -ग्ना -ग्नं, विदूनः -ना -नं, दीनः -ना -नं, आधिमान् -मती -मत् (त्), आकुलितः -ता -तं, परिकम्पितः -ता -तं, आतुरचित्तः -त्ता -त्तं, आर्त्तः -र्त्ता -र्त्तं in comp.; 'friend of the distressed,' आर्त्तबन्धुः *m.*

DISTRESSFUL, DISTRESSING, *a.* क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), क्लेशदः -दा -दं, व्यथकः -का -कं, व्यथाकरः -री -रं, दुःखकरः -री -रं, दुःखमयः -यी -यं, पीडाकरः -रा -रं, उपतापनः -ना -नं, उद्वेजकः -का -कं, आत्ययिकः -की -कं.

DISTRIBUTABLE, *a.* विभाज्यः -ज्या -ज्यं, वण्टनीयः -या -यं, परिकल्पनीयः -या -यं.

To DISTRIBUTE, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or प्रविभज् or संविभज्; विभागशः or यथाविभागं or अंशांशि दा or क्लृप् (c. 10. कल्पयति -यितुं), or परिक्लृप् or विन्यस् (c. 4. -अस्यति -असितुं) or विधा (c. 3. -दधाति -धातुं), ध्वंस् (c. 10. -ध्वंसयति -यितुं), वण्ट् (c. 10. वण्टयति -यितुं), प्रकुट्ट् (c. 10. -कुट्टयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रणी (c. 1. -णयति -णेतुं).—(Distribute food to a party) परिविश् or परिविष् (c. 10. -वेषयति -यितुं).

DISTRIBUTED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः -क्ता -क्तं, संविभक्तः -क्ता -क्तं, पृथग् विन्यस्तः -स्ता -स्तं, परिकल्पितः -ता -तं, प्रणीतः -ता -तं.

DISTRIBUTER, *s.* विभागकर्त्ता *m.* (र्त्तृ), संविभागकृत्, विभागकल्पकः, परिकल्पकः, वण्टनकृत्, अंशयिता *m.* (तृ), अंशदः, विभक्ता *m.* (क्तृ), प्रणेता *m.* (तृ).

DISTRIBUTION, *s.* विभागः, विभागकल्पना, संविभागः, प्रविभागः, विभक्तिः *f.*, विभागकरणं, परिकल्पनं, क्लृप्तिः *f.*, अंशनं, अंशकरणं, वण्टनं, परिनिर्वपणं, प्रणयनं; 'distribution of food to a party,' परिवेषः -षणं.

DISTRIBUTIVE, *a.* विभागदायी -यिनी -यि (न्), विभागकल्पकः -का -कं, अंशकारी -रिणी -रि (न्), वण्टनकारी, संविभागकृत् *m. f. n.*

DISTRIBUTIVELY, *adv.* विभागशस्, विभागतस्, भागशस्, अंशांशि, संविभागेन.

DISTRICT, *s.* मण्डलं, देशः, प्रदेशः, चक्रं, राष्ट्रं, उपवर्त्तनं, गोचरः.

To DISTRUST, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्; न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ).

DISTRUST, *s.* अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, शङ्का, आशङ्का, सन्देहः, निह्नवः, अनासङ्गः.

DISTRUSTED, *p. p.* अविश्वस्तः -स्ता -स्तं, आशङ्कितः -ता -तं, अप्रतीतः -ता -तं,

DISTRUSTFUL, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, आशङ्कान्वितः -ता -तं, साशङ्कः -ङ्का -ङ्कं, रोलधः -धा -धं.

DISTRUSTFULLY, *adv.* अविश्वासेन, अप्रत्ययात्, शङ्कया, साशङ्कं, शङ्कापूर्व्वं.

To DISTURB, *v. a.* (Agitate, disquiet) क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, बाध् (c. 1. बाधते -धितुं), उपरुध् (c. 7. -रुणद्धि -रोद्धुं), धू (c. 5. धूनोति c. 9. धुनाति, धवितुं, धोतुं), मथ् (c. 1. मथति -थितुं) or मन्थ् (c. 1. मन्थति -न्थितुं c. 9. मथ्नाति), लुड् (c. 1. लोडति -डितुं c. 10. लोडयति -यितुं), आलुड्, समालुड्, परिलुड्, विलुड्, विलुप् (c. 6. -लुम्पति -लोप्तुं), विप्रलुप्.—(Disturb the mind) मुह् in caus. (मोहयति -यितुं), विमुह्, व्यामुह्, विप्रमुह्, सम्मुह्, परिमुह्, व्याकुल (nom. व्याकुलयति -यितुं), व्याकुलीकृ, आकुल (nom. आकुलयति -यितुं), आकुलीकृ.—(Excite anger) प्रकुप् in caus. (-कोपयति -यितुं).—(Hinder, interrupt) वृ in caus. (वारयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विहन् (c. 2. -हन्ति -न्तुं), भञ्ज् (c. 7. भनक्ति, भंक्तुं).—(Disturb slumber) निद्रां भञ्ज्; 'to be disturbed in mind,' मुह् (c. 4. मुह्यति,) विमुह्, सम्मुह्, आकुलीभू, व्याकुलीभू.

DISTURBANCE, *s.* (Agitation, disorder) क्षोभः, संक्षोभः, विक्षोभः, व्याक्षोभः, व्यस्तता, विमर्द्दः.—(Emotion of mind, perturbation) आकुलत्वं, व्याकुलत्वं, प्रकोपः, वैक्लव्यं, व्यग्रता, मोहः, आवेगः.—(Tumult) विप्लवः, आहवः, डिम्बः, तुमुलं; 'popular disturbance,' प्रकृतिक्षोभः.—(Interruption) भङ्गः, विच्छेदः, खण्डनं, बाधः.

DISTURBED, *p. p.* क्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं, बाधितः -ता -तं.—(In mind) आकुलः -ला -लं -लितः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, व्याकुलीकृतः -ता -तं, आकुलचित्तः -त्ता -त्तं, मोहितः -ता -तं, विमोहितः -ता -तं, व्यस्तः -स्ता -स्तं, व्यग्रः -ग्रा -ग्रं, कातरः -रा -रं, खेदितः -ता -तं.

DISTURBER, *s.* क्षोभकरः, विक्षोभकर्त्ता *m.* (र्त्तृ), मोहकः.—(Interrupter) भञ्जकः, विच्छेदकारी *m.* (न्), विघ्नकरः, विलोपनकृत्.

DISUNION, *s.* वियोगः, विसंयोगः, विप्रयोगः, असंयोगः, निर्युक्तिः *f.*, भेदः, भिन्नता, विभेदः, विश्लेषः, अश्लेषा, असन्धानं, आसक्तत्वं, सङ्गविच्युतिः *f.*, विच्छेदः, अनैक्यं, पार्थक्यं.

To DISUNITE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), भिद् (c. 7. (भिनत्ति, भेत्तुं), विभिद्, विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), पृथक्कृ, विगम् in caus. (-गमयति -यितुं).

To DISUNITE, *v. n.* वियुज् in pass. (-युज्यते), विप्रयुज्; विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं); विभिद् in pass. (-भिद्यते), विगम् (c. 1. -गच्छति -गन्तुं).

DISUNITED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, निर्युक्तिकः -की -कं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असंहतः -ता -तं, विरहितः -ता -तं, द्वैधीभूतः -ता -तं.

DISUNITER, *s.* वियोगकर्त्ता *m.* (र्त्तृ), भेदकरः, पृथक्कारी *m.* (न्).

DISUSAGE, DISUSE, *s.* अव्यवहारः, अनभ्यासः, असेवनं, अनाचारः, निवृत्तिः *f.*, विरतिः *f.*, व्यवहारनिवृत्तिः *f.*, आचारत्यागः, अभ्यासविच्छेदः.

To DISUSE, *v. a.* व्यवहारं or अभ्यासं त्यज् (c. 1. त्यजति, त्यक्तुं), व्यवहाराद् विरम् (c. 1. -रमति- रन्तुं) or निवृत् (c. 1. -वर्त्तते -र्त्तितुं), न सेव् (c. 1. सेवते -वितुं).

DISUSED, *p. p.* अव्यवहारितः -ता -तं, अनभ्यस्तः -स्ता -स्तं, असेवितः -ता -तं, त्यक्तः -क्ता -क्तं; 'as words,' निरूढः -ढा -ढं.

DITCH, *s.* खातं, खातकं, परिखा, गर्त्तः, खातभूः *f.*, खेयं, अखातं, उपकुल्या, कुल्या, प्रणालः, प्रतिकूपः, निपानं.

To DITCH, *v. a.* परिखन् (c. 1. -खनति -नितुं), आखन्, परिखाकरणार्थं भूमिं खन्, परिखां कृ, गर्त्तं कृ.

DITCHER, *s.* आखनिकः, परिखाखनकः. गर्त्तखनिता *m.* (तृ), खातकः.